एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीतः प्रणम्य ॥ ११.३५ ॥
etacchrutvā vacanaṁ keśavasya
kṛtāñjalirvepamānaḥ kirīṭī |
namaskṛtvā bhūya evāha kṛṣṇaṁ
sagadgadaṁ bhītabhītaḥ praṇamya || 11.35||

अर्जुन उवाच ।
arjuna uvāca |

स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्शांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥ ११.३६ ॥
sthāne hṛṣīkeśa tava prakīrtyā
jagatprahṛṣyatyanurajyate ca |
rakśāṁsi bhītāni diśo dravanti
sarve namasyanti ca siddhasaṅghāḥ || 11.36||

कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास
त्वमक्शरं सदसत्तत्परं यत् ॥ ११.३७ ॥
kasmācca te na nameranmahātman
garīyase brahmaṇo'pyādikartre |
ananta deveśa jagannivāsa
tvamakśaraṁ sadasattatparaṁ yat || 11.37||

त्वमादिदेवः पुरुषः पुराणः
त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥ ११.३८ ॥
tvamādidevaḥ puruṣaḥ purāṇaḥ
tvamasya viśvasya paraṁ nidhānam |
vettāsi vedyaṁ ca paraṁ ca dhāma
tvayā tataṁ viśvamanantarūpa || 11.38||

वायुर्यमोऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ॥ ११.३९ ॥
vāyuryamo'gnirvaruṇaḥ śaśāṅkaḥ
prajāpatistvaṁ prapitāmahaśca |
namo namaste'stu sahasrakṛtvaḥ
punaśca bhūyo'pi namo namaste || 11.39||